ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत् अनिराकरणमस्त्व् निराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

अथ कात्यायनकृतं

चरणव्यूहपरिशिष्टम्

ऋग्वेदखण्डः

अथातश्चरणव्यूहं व्याख्यास्यामस्तत्र यदुपगतं चातुर्वैद्यं चत्वारो वेदा विज्ञाता भवन्ति ।

प्रीतिराम सों नीति पथ चलिय राग रस जीत
तुलसी सन्तन के मतें इहै भगति की रीति —

अथ कातीयचरणव्यूहस्य

पीयूषकणिकाव्याख्या

गणपतिमीशं करुणावरुणालयमन्तरायपगहरम् ।
[illegible] ॥ १ ॥
यस्माच्चातुर्वर्ण्यं चत्वारश्चाश्रमास्त्रयो लोकाः ।
सिद्ध्यन्ति यज्ञसंस्थाः कालत्रितयं नमोऽस्तु वेदाय ॥ २ ॥
यद्विज्ञानमवाप्यैतत्सर्वं प्रवर्त्ततेऽस्माकम् ।
विद्वत्तिलकं नमामि वैदिकधुर्यं श्रीगुरुं पितरम् ॥ ३ ॥

अथेति प्रारम्भार्थको मङ्गलात्मकनिपातः, आनन्तर्यार्थो वा । अतश्शब्दश्च हेत्वर्थः । यतः साङ्गो वेदराशिः समधीतः, अतस्तदनन्तरं यदावश्यकं तत्सम्बन्धि ज्ञानं तन्निरूपणायेद परिशिष्टं चरणव्यूहाख्यं प्रारभ्यत इति भावः । सकलवेदराशेश्चतुर्थो भागश्चरणशब्देनोच्यत इति केचित् । एकविधव्रतेनाध्येतु शक्यो वेदशाखासमूहश्चरणमिति याज्ञिकपीयूषपादाः । तस्य व्यूहः समूहः । "व्यूहः स्याद् बलविन्यासे निर्माणे वृन्दतर्कयोः" इति मेदिनी । एकत्र समदायेनोपदेशग्रन्थ इत्यभिधानसङ्गतिः । तच्चरणव्यूहाख्यं परिशिष्टं व्याख्यास्यामः वदामः ।

तत्र चरणव्यूहे यदुपगतं प्राप्तम् । उक्तमिति पाठभेदे निरूपितमित्यर्थः । तदेव चातुर्वैद्यं, चतुर्णां वेदानां समाहारस्तेन चत्वारोऽपि वेदाः चरणशाखा-[illegible] भवन्तीति ग्रन्थप्र[illegible]

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणा पुरा
कण्ठं भित्वा विनिर्यातौ तस्मात् माङ्गलिकावुभौ

तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति ।
तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति, चर्चा श्रावकश्चर्चकः श्रवणीयपारः क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति ।
चतुष्पारायणमेतेषाम् ।

तत्र चातुर्वैद्यं प्राथम्येन वेदचतुष्टयस्य नामान्युच्यन्ते । ऋग्वेदः—"नियताक्षरपादावसाना ऋच" इत्युक्तलक्षणाभिर्ऋग्भिर्बहुलः । यजुर्वेदः—"अनियताक्षरपादावसानानि यजूंषि" इत्युक्तलक्षणैर्यजुर्मन्त्रैर्बहुलः । सामवेदः—"गीतिविशिष्टा ऋच एव सामानि" इत्युक्तलक्षणैः सामभिर्गानयोनिभूतगं रूपैर्बहुलः । अथर्ववेदः— पूर्वोक्तैस्तच्छैलीत्रितयानतिरिक्तैरथर्वाख्यैः (अथर्वदृष्टैरिति केचित्) शान्तिकपौष्टिकाभिचारिकादिमन्त्रैर्बहुलश्चेति ।

तत्र ऋग्वेदस्य, सर्ववेदोपलक्षकोऽत्र ऋग्वेदस्तस्य चर्चेत्यादीनि मूल एवानुपदमुक्तान्यष्टौ स्थानान्यध्ययनालम्बभूतानि प्रतिष्ठानानि भवन्ति । चर्चा अध्ययनम्, चर्चाध्ययने चुरादय इत्युणादिसूत्रपाठात् । शब्दात्मकवेदस्य गुरुमुखात् वेदपूर्वं श्रवणं [illegible] । श्रावकः वेदाध्यापयिता गुरुः । चर्चकोऽध्येता शिष्यः । श्रवणीयपारः श्रोतुमर्हः श्रवणीयो वेदस्तस्यान्तिमो देशः पारः, तत्समाप्तिरित्यर्थः । प्रारम्भतः समाप्तिपर्यन्तं यथाशक्ति प्रत्यहं स्वाध्यायः । क्रमपारः, क्रमः संहितेति भावः । तस्याः पारो नामादितोऽन्तपठनेन प्राप्तोऽन्तिमः प्रदेशः । सा च संहिता द्विविधा-प्रथमा केवलसंहिता प्रकृतिसंहितेति व्यवह्रियमाणा, अपरा चार्षी योगरूढा वेति । अत्रोभयविधा विवक्षिता । क्रमपदः पदपाठः । तदिदं प्रकृतिपाठद्वयम् । क्रमजटः क्रमदण्डश्चेतिविकृतिपाठद्वयम् । जटाद्यष्टविकृतिषु जटाण्डयोरेव प्राधान्यम् । यतो हि शिखाघनविकृत्यौ जटामनुसरतः । शिष्टाश्च माला, रेखा, ध्वजो रथश्चेति चतस्रो विकृतयो दण्डमनुसरन्ति । ताश्च सर्वा अपि क्रमप्रकृतिका भवन्तीत्युभयत्र क्रमशब्दः । 'प्राधान्येन व्यपदेशा भवन्ति', 'वैशेष्यात्तद्वादस्तद्वाद' इत्यादिकन्यायेन विकृतिद्वयस्य [illegible] चतुर्णां वेदानामृग्वेदादिचरणानां वा भवतीति शेषः । चतुर्णां वेदानां प्रकृतिविकृतिपाठानेवमभियुक्ता अभिप्रयन्ति—

यजुर्वेदो घनान्तः स्यादृग्वेदोऽपि घनान्तकः ।
सामवेदः पदान्तः स्यादथर्वः संहितान्तकः ॥ [illegible]

शाखाः पञ्चविधा भवन्ति शाकला बाष्कला आश्वलायनाः शाङ्खायना माण्डूकायनाश्चेति, तेषामध्ययनम्—

अध्यायाश्च चतुष्षष्टिर्मण्डलानि दशैव तु ।
एकर्चं एकवर्गश्च एकश्च नवर्चस्तथा ॥
द्वौ वर्गौ तु द्वृचौ ज्ञेयौ त्र्यूनं तृचशतं स्मृतम् ।
चतुर्ऋचं समाख्यातं षट्सप्तत्युत्तरं शतम् ॥
पञ्चर्चं द्वादशशतान्यष्टाविंशोत्तराणि च ।
शतत्रयं षडृचञ्च सप्तपञ्चाशदुत्तरम् ॥
सप्तर्चमेकोनत्रिंशदुत्तरं शतमेककम् ।
अष्टर्चं पञ्चपञ्चाशद्वर्गाः स्युर्नाधिकोत्तराः ॥
वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे ।
ऋचां दश सहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥

इति कात्यायनीये चरणव्यूहपरिशिष्टे प्रथमः ऋग्वेदखण्डः

तेषां शाकल-बाष्कला-श्वलायन-शांखायन-माण्डूकायनचरणानामृग्वेदान्तर्गतानाम् अध्ययनं भवति ।

ऋग्वेदस्याध्यायसूक्तादीनां संख्योपदिश्यते । अधीयत इत्यध्यायो वेदः । तस्य येऽवान्तरभूताः स्वल्पकालेनाधीयमाना वेदविभागास्तेऽप्यध्यायशब्देन व्यवह्रियन्ते । ते च चतुःषष्टिसंख्याकाः सन्ति । अनेकसूक्तानां समुदायो यत्र तानि मण्डलानि दशसंख्याकानि ऋग्वेदे । 'एकर्चं' इत्यारम्य 'वर्गाः स्युर्नाधिकोत्तराः' इत्यन्तमृक्परिगणनं वर्गपरिगणनञ्च । तथा हि संख्यानम्—एकर्चः १, नवर्चः १, द्वयृचौ २, तृचवर्गाः ९७, चतुर्ऋचवर्गाः १७६, पञ्चर्चाः १२२८, षडृचाः ३५७, सप्तर्चाः १२९, अष्टर्चाः ५५ । एतच्च कात्यायनीय-[illegible] प्रतिभाति । शौनकी[illegible]नुसारं पारिगणनं शाकलपाठमाश्रित्येति सम्भावनम् । तत्पारिगणनं तु—सूक्तानि १०२८, वर्गाः १०२४, ऋचः १०५५२, इत्येतद् बालखिल्यसूक्तसहितम् ।

बालखिल्यैर्विना तु—२००६ वर्गाः, १०५८०¼ ऋचश्च विज्ञेयाः । [illegible]मुच्यते ।

इत्यृग्वेदखण्डविवृतिः ।

यजुर्वेदखण्डः

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरकानां द्वादश भेदा भवन्ति । चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्तान्तवीयाः श्वेताश्वतरा औपमन्यवाः पाताण्डनीया मैत्रायणीयाश्चेति । तत्र मैत्रायणीयानां सप्त भेदा भवन्ति, मानवा वाराहा दुन्दुभाश्छागलेयाः श्यामाः श्यामायनीया हारिद्रवीयाश्चेति । तत्र हारिद्रवीयानां पञ्च भेदा भवन्ति, तत्र हारिद्रवीयाऽऽसुरी गार्गी शार्कराक्ष्याग्नावासवी चेति पञ्चेति हारिद्रवीयसङ्ग्रहः ।

तेषामध्ययनमष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवति, तान्येव द्विगुणान्यधीत्य पदपारो भवति, तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद् भवति ।

यजुर्वेदस्य शुक्लकृष्णोभयात्मकस्य मध्येऽपरस्य कृष्णस्य षडशीतिः ८६ संख्याकाः शाखाभेदाः सन्ति । शुक्लयजुर्भेदानामुपरिष्टाद् वक्ष्यमाणत्वादत्रानुपदं षडशीतिरित्यवान्तरभेदकथनोपक्रमात् तथा प्रतिपत्तेः । तत्र उक्तषडशीतिशाखानां मध्ये चरकाख्यमुख्यचरणस्य द्वादशभेदाः चरका आह्वरका इत्यादयो मैत्रायणीयान्ताः सन्ति । तत्रापि मैत्रायणीयानां मानवा वाराहा इत्यादयो हारिद्रवीयान्ताः सप्त भेदाः । हारिद्रवीयानामपि पञ्चभेदा उक्ताः ।

तेषां द्वादशानां चरकाणां, सप्तानां मैत्रायाणीयानां, पञ्चानां हारिद्रवीयाणां च अध्ययनमष्टादशसहस्रसंख्याकयजुर्गणरूपम् । यजुःसंख्येयं मन्त्रब्राह्मणे सङ्कलीकृत्य मन्तव्या । एतावन्तञ्च यजुर्गणमधीयानः समग्रशाखाध्यायी शाखापार इति कथ्यते । उपर्युक्तसंख्याकानि यजूंष्येव द्विगुणानि, [illegible] पदपारो भवति । पुनस्तृतीयो गुणः क्रमपाठलक्षणो येषां तादृशानि तान्येव यजूंषि सम्पादितानि कृत्वाधीयानः क्रमपारो भवति । मन्त्रब्राह्मणयोरुभयोरपि वेदभागयोः संहिता-पद-क्रमरूपं [illegible] [illegible]दर्शनात् ।

तत्र षडङ्गानि भवन्ति—शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।

छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥

तथा प्रतिपदमनुपदं छन्दोभाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि।

अङ्गमित्युपाङ्गानामप्युपलक्षकम्। तेनाङ्गानामनन्तरमुपाङ्गानां निरूपणं सङ्गच्छते। षडङ्गानि उपाङ्गानि च वेदार्थावगमोपकारकाणि वेदाध्ययनेन साकमधीत्य षडङ्गविद् भवतीति साङ्गोपाङ्गवेदाध्ययनप्रशंसा। तानि च षडङ्गानि. शिक्षा-कल्प-व्याकरण-निरुक्त-च्छन्दो-ज्योतिषाख्यानि [illegible] द्वारा फलनिरूपणं छन्दः पादावितिकारिकाद्वयाशयः।

अथोपाङ्गनिरूपणम्। प्रतिपदं प्रतिचरणं भिद्यमानमुपाङ्गशास्त्रम्। अनुपदम्, इदमुपाङ्गं लुप्तप्रायम्। शौनकीयचरणव्यूहस्य महिदासव्याख्यायां, कातीयस्य विषमपदाछङ्क्रियायाञ्च अनुपदस्य नोपाङ्गत्वेन परिगणनं कृतं तच्चासमञ्जसम्। उपाङ्गत्वविरहे तदुक्तेरसङ्गतार्थत्वात्, अनुपदसूत्रोपलब्धेश्च। तत्रैव व्याख्याद्वये छन्दः भाषा चेति द्वयं पृथक्पृथगुपाङ्गत्वेनोक्तं तदप्यसङ्गतम्। छन्दोभाषेति प्रातिशाख्यापरपर्यायमुपाङ्गशास्त्रं प्रसिद्धम्। व्याख्याद्वये छन्दसः पृथक्परिगणने अङ्गेष्वपि छन्दसः संख्यानात् पुनरुक्तिवैयर्थ्यापत्तिश्च। भाषेत्युपाङ्गस्य च कुत्रापि नोल्लेखः। प्राचीनाचार्यैरपि—प्रतिपदश्चानुपदं छन्दोभाषासमन्वितम्। मीमांसान्यायतर्काश्च उपाङ्गानि विदुर्बुधाः॥ (तै० प्रा० ५२९ पृ०) इत्यादिना छन्दोभाषाख्योपाङ्गस्य [illegible] संवदति। धर्मो धर्मशास्त्रम्। एतच्च क्वचन नोपाङ्गेषूपदिष्टम्। मीमांसा नाम पूर्वोत्तरकर्मब्रह्ममीमांसारूपं जैमिनिव्यासेत्याचार्यद्वयप्रणीतं शास्त्रम्। [illegible] षोडशपदार्थाः। [illegible] चेति [illegible]ोपाङ्गानि भवन्ति।

तथाऽत्र तैत्तिरीयकानां द्विभेदा भवन्ति-औखेयाः खाण्डिकेयाश्चेति। तत्र खाण्डिकेयानां पञ्च भेदा भवन्ति—भारद्वाजी आपस्तम्बी बौधायनी सत्याषाढी शाट्यायनी चैति। तेषामध्ययनम्।

काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिकयकाश्चतुः।
चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट्॥
एकपञ्चाशदधिकाः संख्याः पञ्चाशदुच्यते।
द्विसहस्रञ्चैकशतमष्टानवति चाधिका॥
लक्षैकं तु द्विनवतिसहस्राणि प्रकीर्तितम्।
पदानि नवतिश्चैव तथैवाक्षरमुच्यते॥
लक्षद्वयं त्रिपञ्चाशत् सहस्राणि शताष्टकम्।
अष्टषष्ट्यधिकञ्चैव यजुर्वेदप्रमाणकम्॥
शाखावाक्यान्ययुतानि सहस्राणि नवानि च।
चतुः शतान्यशीतिश्च अष्टौ वाक्यानि गण्यते॥

इति ब्राह्मणम्। एवमेषामध्ययनं प्रवचनीयं सौत्रिकञ्चेति। तत्र कठानां तूपगाश्चतुश्चत्वारिंशत्।

तथा तद्वच्चात्र कृष्णयजुर्वेदे षडशीतिशाखानां मध्ये तैत्तिरीयकाणाम् औखेयाः खाण्डिकेयाश्चेति द्विप्रकारका भेदेनाध्यायिनो भवन्ति। खाण्डिकेयानामपि तत्र भारद्वाजादयो पञ्च भेदाः। सत्याषाढी हिरण्यकेशीत्यनर्थान्तरम्। तेषां सकलानां तैत्तिरीयाणामध्ययनं, तदर्थं च संख्यादिकमुच्यते—सप्तकाण्डात्मकमिदम्। प्रश्नाश्चतुश्चत्वारिंशत्। एकपञ्चाशदधिकं षट्शतमनुवाकाः। द्विसहस्रैकशताष्टानवतिः पञ्चाश्यः। लक्षैकद्विनवतिसहस्रनवतिसंख्याकानि पदानि। लक्षद्वयत्रिपञ्चाशत्सहस्राष्टशतान्यष्टषष्ट्यधिकानि चाक्षराणि।

अथ [illegible] शता-ष्टाशीतिसङ्ख्यापारामतानि एवमुक्तप्रकारेणैषां तैत्तिरीयाणां प्रवचनीयं वेदसम्बन्ध्यध्ययनम्। पुनश्च सौत्रिकमध्ययनमुच्यते। तेषु श्रौतगृह्यधर्मप्रतिपादकानि सूत्राणि, क्वचित तत्परिशिष्टानि च। तत्र कठानामुपगा [illegible] [illegible]।

मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते ।
यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः ॥ इति ।

तत्र वाजसनेयिनां पञ्चदश भेदा भवन्ति—जाबाला बौधेयाः काण्वा माध्यन्दिनाः शापेयास्तापायनीयाः कपोलाः पौण्ड्रवत्सा आवटिकाः परमावटिकाः पाराशरा वैनधेया गालवाः कात्यायना बैजवापाश्चेति । तेषामध्ययनम्—

द्विसहस्रं शतन्यूनो मन्त्रे वाजसनेयके ।
ऋग्गणः परिसंख्यातः शेषमन्यद् यजुः स्मृतम् ॥

अष्टौ सहस्राणि शतानि चाष्टावशीतिरक्षराण्यृग्भिर्विभक्तं
केवलं सखिलं सशुक्रियं च यत् ।

कृष्ण यजुर्वेदस्वरूपभेदो निरूप्यते—मन्त्रब्राह्मणयोमिश्रोऽयं तैत्तिरीयः कृष्णयजुर्वेदः । त्रिगुणं [illegible] यथा स्यात् तथा यस्यां यस्यामपि शाखायां पठ्यते स यजुर्वेदोऽर्थात् कृष्णयजुर्वेदो विज्ञेयः । अन्ये कृष्णभिन्नाः शाखान्तराः शुक्लजुर्वेदीयाः शाखाः ऋषिभिः स्मृताः । 'विज्ञेय अन्ये' इत्यत्रार्षः सन्ध्यभावो वक्तव्यः । शेषाः इति पाठान्तरे तु सर्वं समञ्जसम् ।

तत्र यजुर्वेदस्य शुक्ले भेदे वाजसनेयिनां वाजसनेयेन याज्ञवल्क्येन प्रवर्तितानां शाखानां पञ्चदश भेदाः जाबाला इत्यादयो बैजवापान्ताः परिगणिताः । शुक्लत्वनिमित्तं वाजसनेयशब्दप्रवृत्तिं च बहुधा विद्वांसो निर्द्धारयन्ति । सोऽयं विषयस्तत्र तत्र द्रष्टव्यः । तेषां पञ्चदशानां वाजसनेयिनामध्ययनमाह—

वाजसनेयके शुक्लयजुःपञ्चदशशाखाकदम्बके मन्त्रे मन्त्रगणे, नियताक्षरपादावसानाश्छन्दोबद्धा मन्त्रा ऋचस्तासामृचां गणः समूहः शतन्यूनद्विसहस्रसङ्ख्यः परिसङ्ख्यातः । यदन्यच्छेषभूतमृग्गणव्यतिरिक्तं तदनियताक्षरपादावसानं [illegible] यजुर्मन्त्रजातं स्मृतम् । तानि च यजूंषि तावदष्टौ सहस्राण्यष्ट[illegible]शीतिसंख्याकान्यक्षराणीति परिसङ्ख्यातानि । ऋग्भिर्विभक्तमृग्भ्यो विभक्तं यजुर्जातमित्यर्थः । ऋचोऽप्यत्र यजुर्धर्माक्रान्तत्वाद् यजुःस्वरूपा एव । एवञ्च सकलमपि परिगणितं मन्त्रजातम् ।

सकलं परिसंख्यातं ब्राह्मणं च चतुर्गुणम् ।

तत्र माध्यन्दिनीयपरिमाणं तु—

कण्डिकास्तु परिज्ञेयाः शतान्येकोनविंशतिः ।
पञ्चसप्तत्यधिकानि वेदे माध्यन्दिनीयके ॥
ब्राह्मणं तु शतपथं काण्डानि च चतुर्दश ।
मन्त्रः पदः क्रमश्चैव चतुर्थं स्याज्जटा तथा ॥
क्रममाला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥

केवलम्—इषेत्वेत्यादि शादन्दद्भिरित्यन्तं पञ्चत्रिंशदध्यायसमाम्नातं केवलसंज्ञकम् । सखिलं—अग्निश्चेत्यारभ्य अपेत इत्यन्ता पञ्चाध्यायी पञ्चत्रिंशदनुवाकात्मिका खिलसंज्ञिका, तया सहितम् । सशुक्रियम्—उक्तावशिष्टम् ऋचं वाचमित्यारभ्य ईशावास्यमित्यन्ता पञ्चाध्यायी एकादशानुवाकात्मिका शुक्रियसंज्ञिका, तया सहितम् । [illegible] परिसंख्यातमित्यर्थः । ब्राह्मणं शुक्लयजुर्वेदीयं शतपथाख्यं तूक्तयजुर्गणसंख्यापेक्षया चतुर्गुणमस्ति ।

तत्र पञ्चदशशाखामध्ये सर्वाधिकप्रसिद्धत्वात् माध्यन्दिनीयशाखाया मन्त्रपरिमाणमाह—कण्डिकारूपा मन्त्राः पञ्चसप्तत्यधिकैकोनविंशतिशतपरिमिताः । कण्डिकास्वरूपमाहुर्याज्ञिकपीयूषाः—स्मार्ते प्रयोगे स्युर्मन्त्राः कण्डिकान्तास्तु सर्वथा । एकस्यां कण्डिकायां स्युर्बहवोऽपि यथावचः । लोके च मन्त्रशब्दोऽयं कण्डिकासु प्रयुज्यते ॥ इति । शतपथब्राह्मणं तु चतुर्दशकाण्डात्मकम् । एवं माध्यन्दिनीयानां विशेषमुक्त्वा पुनः सर्वसाधारणमध्ययनं निरूपयति—

मन्त्रः संहितापाठः । पदः पदपाठः, पाठविशेषणधियाऽत्र पुल्लिङ्गप्रयोगः । क्रमः क्रमपाठः । इमे त्रयः प्रकृतिपाठाः । जटा माला शिखा, रेखा, ध्वजः, दण्डः, रथः, घनः, [illegible] निरूपिताः । अतश्च त्रिप्रकारकप्रकृत्यध्ययनं चतुर्थञ्च विकृतिरूपं जटादीनामध्ययनम् । क्रमस्य प्रकृतित्वं प्रसाधयति—ताश्च सर्वा विकृतयः क्रमपूर्वाः क्रमप्रकृतिका अध्येतव्या भवन्तीति [illegible] ।

पारस्करं गृह्यसूत्रं कल्पः कात्यायनीयकः ।
षडङ्गोपाङ्गयुग्वेदो यथोक्तफलदो भवेत् ॥

तत्र परिशिष्टानि भवन्ति—यूपलक्षणं, छागलक्षणं, प्रतिज्ञाऽनुवाकसंख्या, चरणव्यूहः, श्राद्धकल्पः, शुल्बमृग्यजुषं, पार्षदमिष्टकापूरणं, प्रवराध्यायो, मूल्याध्याय, उञ्छशास्त्रं, निगमा, यज्ञपार्श्वे, हौत्रिकं, प्रसवोत्थानं, कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति ।

अनुक्रमः पदज्योतिर्यजुर्वा च विधानकम् ।
कर्मप्रदीपिका चैव स्वराणां व्यञ्जनं तथा ॥
मन्त्रभ्रान्तिहरश्चैव शिक्षाणां पञ्चकं तथा ।

परशाखायां सूत्रप्रणयनेन पारक्यं सूत्रजातं करोतीति व्युत्पत्त्या पारस्कर [illegible] कात्यायनस्य [illegible] नामधेयम् । [illegible] कात्यायनोऽपि पारस्कर उच्यते इति केचन । एतत्प्रणीतं सूत्रं गृह्यं गृह्याग्निसाध्यकर्मप्रतिपादकं वर्तते । कात्यायनस्यैव नाम्ना प्रसिद्धस्तत्प्रणीतः कल्पः श्रौताग्निसाध्यकर्मप्रतिपादकसूत्रग्रन्थ । षडङ्गान्युपाङ्गानि च पूर्वं निरूपितान्येव । तेषां चतुर्वेदीयसर्वशाखासाधारण्येन श्रुतिः तैर्युक्तो वेदोऽधीतो यथोक्तफलदाने समर्थो भवेत् ।

तत्र शुक्लयजुर्वेदे यूपलक्षणादीनि कूर्मलक्षणान्तान्यष्टादशपरिशिष्टानि भवन्ति । परिशिष्टानां विषयस्वरूपं त्वाश्वलायनगृह्यपरिशिष्टप्रतिज्ञायां लक्षितम्—गृह्येऽपि यानि नोक्तानि क्वचिद्द्वैतानिकेऽपि वा । विधेरलोपनार्थाय तानि वक्ष्याम्यतः परम् ॥ इति श्रौतगृह्यकल्पयोर्यद् यदुक्तं ततो यदवशिष्टान्युक्तं [illegible] तानि परिशिष्टशब्दवाच्यानि ज्ञेयानि । अत्र परिशिष्टनामसु निगमा इति बहुवचनं तद्गतपदार्थबाहुल्याभिप्रायेण [illegible]

अथ परिशिष्टातिरिक्ता अन्येऽध्ययनोपकारकग्रन्थाः केचन निर्दिश्यन्ते—अनुक्रमः सर्वानुक्रमः । यजुर्विधान सप्ताध्यायम । कर्मप्रदीपिका छन्दोगपरिशिष्टम् । स्वराणां [illegible] ।

शेषमध्ययनमुच्छिन्नं कल्पसूत्रेषु पठ्यते ॥
अङ्गब्राह्मणकल्पानां साम्नां च यजुषामृचाम् ।
षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्न उच्यते ॥

इति कात्यायनीये चरणव्यूहपरिशिष्टे द्वितीयो यजुर्वेदखण्डः

सामवेदखण्डः

सामवेदः किल सहस्रभेद आसीत्, तेष्वनध्यायेष्वधीयानाः शक्रेणाभिहताः, शेषान् प्रवक्ष्यामि । तत्र राणायणीयानां सप्त भेदा भवन्ति—राणायणीया शाट्मुग्र्याः कालोपा महाकालोपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति । तत्र कौथुमानां षड् भेदा

शिक्षाणां पञ्चकम् याज्ञवल्क्यीया, अमोघानन्दिनी, कात्यायनी, [illegible] एव । शिष्टमध्ययनमुच्छिन्नप्रायम् । तथा च कल्पोक्तानां विनियुक्तमन्त्राणां रूपेण पठ्यमानं दृश्यत एव ।

अथाध्वर्युलक्षणमुच्यते—अङ्गब्राह्मणादीनां, कल्पादि सूत्राणामृग्यजुःसाममन्त्राणाञ्च परस्परं प्रकृष्टं विभागं यो जानाति स कृत्स्नः सम्पूर्णः पारङ्गत इति भावः, अध्वर्युः समग्रमध्वरं युनक्तीत्यन्वर्थसंज्ञो भवति । अध्वर्योर्यजुर्वेदित्वादत्र खण्डे तल्लक्षणमिति ।

इति यजुर्वेदखण्डविवृतिः ।

सामवेदः सहस्रं भेदाः शाखा यस्य तादृश आसीत् । तदिदं "सहस्रवर्त्मा सामवेदः" इति महाभाष्योक्त्या, "सहस्रं शाखा ह्यर्थतो वेद शबरः" इति प्रसिद्ध्या च संवदति । केचन सामगाने पद्धतयः सहस्रसंख्या आसन्निति प्रतिपादयन्ति । तत्र च [illegible] त्रयोदशानामेव सामश्रुतर्षीणां सामतर्पणे परिगणनञ्च प्रमाणत्वेनोपस्थापयन्ति । पुराणाख्याने च नादरं दर्शयन्तीति न युक्तम् । यजुर्वेदखण्डयोर्भेदपदेन शाखानामपदर्शितत्वादत्रापि सहस्रशाखाः भेदपदाभिधेयाः । अतयात्वे शबरप्रसि[illegible]

भवन्ति—आसुरायणा वातायनाः पतञ्जलयो वैदभृतः प्राचीन-योग्या जैमिनेयाश्चेति ।

तेषामध्ययनम्—चतुर्दशोत्तरशतमाग्नेयं, द्विपञ्चाशदधिक-त्रिशतमैन्द्रं, शतमेकोनविंशतिकं च पावमानं, पञ्चपञ्चाशदा-रण्यकं, दश महानाम्न्यः, पञ्चविंशत्यधिकं द्वादशशतमुत्तरार्चि-कमित्येषा छन्दोगानामार्चिकसंहिता ।

द्विसहस्रं द्वाविंशतिकं च चतुर्धा सामानि यानि गायन्ति सामगाः । तानि सबालखिल्यानि सारण्यकानि ससुपर्णप्रेङ्खानि ।

"तेष्वनध्यायेष्वधीयानाः शक्रेणाभिहताः शेषान् प्रवक्ष्यामि" इति प्रतिपदमु-च्यमानैतिह्यविरोधापत्तिः ।

तेषु सहस्रसामशाखासु मध्ये यैरनध्यायेषु स्वाध्यायः कृतस्तद्दण्डार्थं ते शक्रेण [illegible] मु-शाखासु राणायनीयानां राणायनीयशाट्यमुग्र्याद्याः सप्त, कौथुमानाञ्चा-सुरायणादिजैमिनीयान्ताः षट् शाखाः, सङ्कलनया च त्रयोदश ग्रन्थोक्ताः । अतएव सामतर्पणे—राणायन-शाट्यमुग्र्य-व्यास-भागुरि-औलुण्डि-गोल्गुल्वि-भानुमानौपमन्यव-काराटि-मशकगार्ग्य-वार्षगव्य- कुथुम-शालिहोत्र - जैमिन्या-ख्यास्त्रयोदश सामगाचार्याः स्मृताः ।

एतेषां त्रयोदशानामध्ययनसङ्ख्यां निर्दिशति—आग्नेये पर्वणि चतुर्दशोत्तरं शतं मन्त्राः । ऐन्द्रे पर्वणि द्विपञ्चाशदधिकं त्रिशतं मन्त्राः । पावमाने पर्वणि एकोनविंशत्यधिकशतं मन्त्राः । आरण्यके पञ्चपञ्चा-शन्मन्त्राः । ततश्च महानाम्नीसंज्ञका मन्त्रा दश । इति पूर्वार्चिकम् । [illegible] ।

ग्रामगेयारण्यगेयोहोह्येत्याख्यानि चतुर्धा चतुःप्रकारकाणि सामानि [illegible], तानि च वालखिल्या [illegible] सहितानि सन्ति ।

पुनरष्टौ ब्राह्मणानि । तान्यधीत्य चण्डात् प्रचण्डतरो भवति ।

केचित् पुनर्ऋक्तन्त्रं सामतन्त्रं संज्ञाधातुलक्षणमिति विधीयन्ते । एतानि परिशिष्टान्यधीत्य शिष्टविशिष्टो भवति । इत्येतत् सामगानामध्ययनं स्मृतम् ।

इति कात्यायनीये चरणव्यूहपरिशिष्टे तृतीयः सामवेदखण्डः

अथर्ववेदखण्डः

अथर्ववेदस्य नव भेदा भवन्ति—पिप्पलादाः शौनका मोदाः शौक्वायना जाजला ब्रह्मबलाः कुमुदादिनो वेदस्पर्शाश्चारणवि-द्याश्चेति । तेषामध्ययनम्—

पुनश्च ब्राह्मणान्यप्यष्टसङ्ख्यानि । तेषां नामानि चाह सायणार्यः— अष्टौ हि ब्राह्मणग्रन्थाः प्रौढब्राह्मणमादिमम् । षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत् । आर्षेयं देवताध्यायो भवेदुपनिषत्ततः । संहितोपनिषद्वंशो ग्रन्था अष्टावितीरिताः ॥ इति । तानि सर्वाण्यापि आर्चिकमन्त्रसामगान-ब्राह्मणानि चाधीत्य चण्डात्प्रचण्डतर उत्कृष्टादुत्कृष्टतरो भवतीति भावः ।

अथ विशिष्टमध्ययनं विधीयते—केचन सविशेषं परिश्राम्यन्तः सामाधीयन्ते । तत्र ऋक्तन्त्रादिलक्षणान्तानि गोभिलगृह्य-लाट्यायनश्रौत-पुष्पसूत्राद्युपग्रन्थानामुपलक्षणानि । ऋक्तन्त्रादीनि सामसम्बन्धिलक्षणनिरू-पकाणि शास्त्राणि परिशिष्टानि चाधीत्य शिष्टेषु सामवित्सु विशिष्टो महामान्यः श्रेष्ठो भवति । इत्येवं प्रकारेणैतत्सामगानामध्ययनं स्मृतमृषिभिरिति ।

इति सामवेदखण्डविवृतिः ।

अथर्वाख्येनर्षिणा दृष्टस्य वेदस्य पिप्पलादाद्या नव शाखाः चारण-विद्यान्ताः परिसङ्ख्याताः । तेषां, नवानामथर्वशाखानामध्ययनं द्विविधं ब्रह्मत्वरूपमभिचाररूपञ्च भवति, तच्च सरहस्यं सोपनिषत्कम् । अथर्ववेदस्य

द्वादशैव सहस्राणि मन्त्राणामाभिचारिकम् ।
ब्रह्मत्वं सरहस्यं स्यादथर्ववेदविस्तरम् ॥

तेषां पञ्च कल्पा भवन्ति—नक्षत्रकल्पः शान्तिकल्पो वितानकल्पः संहिताकल्प आङ्गिरसकल्पश्चेति । कल्पे कल्पे परिशिष्टानि भवन्ति ।

सर्वेषामेव वेदानामुपवेदा भवन्ति—ऋग्वेदस्यायुर्वेद उपवेदो, यजुर्वेदस्य धनुर्वेद उपवेदः, सामवेदस्य गान्धर्ववेद उपवेदोऽथर्ववेदस्य स्थापत्यवेद उपवेद, इत्याह भगवान् कात्यायनः ।

इति कात्यायनीये चरणव्यूहपरिशिष्टे चतुर्थोऽथर्ववेदखण्डः

द्विपञ्चाशदुपनिषदः सन्तीति श्रूयते । अथर्वाध्ययने च मन्त्रसङ्ख्या द्वादशसहस्रात्मिका । अत्र ब्रह्मत्वं शान्तिकपौष्टिककर्मणां उपलक्षणम् ।

तेषामुभयविधकर्मणामुपबृंहणार्थं पञ्च कल्पा भवन्ति । ते च—नक्षत्रकल्पः, शान्तिकल्पः, वितानकल्पो वैतानश्रौतसूत्राख्यः, संहिताकल्पः संहिताविध्यपरपर्यायः कौशिकगृह्यसूत्राख्यः, आङ्गिरसकल्पोऽभिचारकल्पापरपर्यायः । प्रतिकल्पं सम्बद्धानि कोटिहोमाग्निहोत्रादीनि द्वासप्ततिसङ्ख्याकानि अथर्वपरिशिष्टानि भवन्तीति विद्वांस आमनन्ति ।

सर्वेषां चतुर्णामपि वेदानां प्रत्येकमेक उपवेदोऽस्ति । ते च यथाक्रमं निर्दिश्यन्ते—आयुर्वेद-धनुर्वेद-गान्धर्ववेद-स्थापत्यवेदाश्चत्वार उपवेदाः । अत्रायुर्वेदस्य ऋग्वेदोपवेदत्वेऽस्ति विप्रतिपत्तिस्तस्याथर्वविषयत्वात् । तदन्यत्र वक्ष्यामः । इत्येवं चतुर्वेदीयचरणानां व्यूहं विस्तारं भगवान् कात्यायनो महर्षिराहेति ।

इत्यथर्ववेदखण्डविवृतिः ।

चतुर्वेद-फलश्रुतिखण्डः

य इमे चत्वारो वेदास्तेषामेकैकस्य कीदृक् रूपं वर्णः प्रमा विधेत्युच्यते—ऋग्वेदः पद्मपत्राक्षः प्रबलजठरः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्लक्ष्णो गोक्षीरवर्णः श्वेतकीर्तिः, प्रमाणे वितस्तिपञ्चकः ।

यजुर्वेदः पिङ्गाक्षः कृशमध्यः स्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा, प्रादेशषट्कमात्रो दीर्घत्वेन । सामवेदो नित्यं स्रग्वी सुप्रीतः शुचिवासाः क्षमी दान्तो बृहच्छरीरः कातरनयनः काञ्चननयनो वा आदित्यवर्णो वेर्णन, षडरत्निमात्रः । अथर्ववेदस्तीक्ष्णतरः प्रचण्डः कामरूपी विशालाक्षो विश्वात्मा विश्वसृट् क्षुद्रकर्मा विश्वसाक्षी महाप्राज्ञो नीलोत्पलवर्णो वर्णेन, पञ्चारत्निमात्रः ।

य इमे ऋग्वेदादयश्चत्वारो वेदा भेदादिवर्णनेनोक्तास्तेषां मध्ये एकैकस्य रूपमाकृतिः, शुक्लादिवर्णः, प्रमा परिमाणम्, इत्यादीनां विधा प्रकार उच्यते । वेदानां वाङ्मयस्वरूपोपदेशानन्तरं श्रद्धातिशयविषयत्वात्तपामाधिदैविकं स्वरूपमप्युपदिश्यते । तत्र ऋग्वेदस्य कमलपर्णनयनादिरूपम् । अत्र नीलमेव कमलमभिप्रेतं तस्यैव नेत्रोपमानस्यौचित्यात् । श्लक्ष्णो मृदुशरीरः । द्वादशाङ्गुलात्मको वितस्तिस्तेन सार्द्धद्विहस्तपरिमित उपविश्य मन्तव्यः । यजुर्वेदः क्षीणकटिः । सोऽप्युपविशन् दशाङ्गुलात्मकप्रादेशपरिमाणेन सार्द्धद्विहस्तपरिमितः । सामवेदस्तु मालाधारी क्षमाशीलो जितेन्द्रिय- [illegible] पञ्चदशाङ्गुलपरिमित उक्तः । अथर्ववेदोऽत्युग्रः क्रोधशीलः इच्छारूपधारी उपनिषदां बहुत्वाद्विश्वात्मा अभिचारप्रयोजनवन्मन्त्रबाहुल्यात क्षुद्रकर्मा तिष्ठन् स [illegible]

ऋग्वेदस्यात्रेयगोत्रं सोमो दैवतं गायत्रीछन्दः। यजुर्वेदस्य काश्यपगोत्रमिन्द्रो दैवतं त्रिष्टुप्छन्दः। सामवेदस्य भारद्वाजगोत्रं रुद्रो दैवतं जगतीछन्दः। अथर्ववेदस्य वैखानसगोत्रं ब्रह्म दैवतमनुष्टुप्छन्दः।

य इदं वेदानां नाम रूपं गोत्रं दैवतं छन्दः प्रमाणं वर्णं वर्णयति, सोऽविद्वान् विद्वान् भवति, जन्मजन्मनि वेदपारगो भवति, अव्रतो व्रती भवति, अब्रह्मचारी ब्रह्मचारी भवति, जातिस्मरो जायते।

य इदं चरणव्यूहं गुर्विणीं श्रावयेत् स्त्रियम्।
पुमांसं जनयेत् पुत्रमृषिभिर्वेदपारगम्॥
य इदं चरणव्यूहं श्राद्धकाले पठेद् द्विजः।
अक्षय्यं तत् भवेच्छ्राद्धं पितॄन् तत्रोपतिष्ठते॥
य इदं चरणव्यूहं पठेत् स पंक्तिपावनः।
तारयेदात्मनो वंश्यान् सप्त पूर्वांस्तथाऽपरान्॥
य इदं चरणव्यूहं पठेत् पर्वसु पर्वसु।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय कल्पते॥

वेदचतुष्टयस्य गोत्रदैवतच्छन्दसां विधानं स्पष्टार्थमेव। अथ प्रसङ्गादन्यत्रोक्तानि वेदपत्नीनां नामानि निर्दिश्यन्ते—ईतिधृ तिः शिवा श्यामा चतस्रो वेदपत्न्यः। ज्ञातव्या यज्ञकालेषु ईशानादिव्यवस्थिताः। इति।

अथ वेदसम्बन्धिनामरूपादिज्ञानफलश्रुतिः य इदमित्यादिना। अथ चरणव्यूहाध्ययनफलमुच्यते।

फलश्रुतिः स्पष्टार्था। गर्भिणी गुर्विणी। पुमांसं पुरुषलक्षणोपेतमृषिभिस्तुल्यं पुत्रं जनयति। श्राद्धं कृतं पितॄनुपतिष्ठते पितृतृप्तिकरं भवतीत्यर्थः। भा[illegible] स्वाच्चतत्सांसर्गजदोषान [illegible] पावनत्वं स [illegible] उच्यते। स्वर्गं गत्वा पश्चाद् ब्रह्मभावाय तथा

इत्याह भगवान् कात्यायनो भगवान् कात्यायनः।

इति कात्यायनीये चरणव्यूहपरिशिष्टे पञ्चमश्चतुर्वेद-फलश्रुतिखण्डः

इति कात्यायनीयं चरणव्यूहपरिशिष्टं समाप्तम्।

योग्यश्च भवतीति चरमलक्ष्यप्राप्तिरुक्ता। इदमिति क्लीबोक्तिः परिशिष्टविशेष्यमभिप्रेत्य मन्तव्या।

याज्ञवल्क्यसुतो विश्वामित्रगणान्तर्गतकतगणोद्भवः परिशिष्टश्रौतगृह्यकल्पानां प्रणेता इदं चरणव्यूहपरिशिष्टमाहेति कर्तृनिर्देशः। आर्षग्रन्थेऽवपरोक्षवृत्त्या स्वनामोल्लेखपूर्वकं ग्रन्थकर्तृत्वव्यवहारो दृष्टचरो रूढश्च। कात्यायनपदाभ्यासोऽवसानद्योतनार्थं इति शम्।

इति चतुर्वेदफलश्रुतिखण्डविवृतिः।

विद्यावारिधि श्रीकिशोरमिश्रकृता [illegible]

पीयूषकणिकाव्याख्या सम्पूर्णा।

[illegible]
ankurnagpal108@gmail.com